
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

श्रीगणेशाय नमः ॥ ॥ एहमेव परं ब्रह्म वासुदेवाख्यमव्ययं ॥ इति स्यां निश्चितो मुक्तो बद्ध एवान्यतो भवेत् ॥१॥ एहमेव परं ब्रह्म न चाहं ब्रह्मणः पृथक् ॥ इत्येवं समुपासीत ब्राह्मणो ब्रह्मणि स्थितः ॥२॥ एहमेव परं ब्रह्म निश्चितं चित्तचिंतितं चिद्रूपत्वादसंगत्वादबाध्यत्वात्प्रयत्नतः ॥३॥ सर्वोपाधिविनिर्मुक्तं चैतन्यं च निरंतरं ॥ तद्ब्रह्माहमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ॥४॥ अहं ब्रह्मास्मि यो वेद स सर्वं भवति त्विदं ॥ नाभूत्या ईशते देवा तेषामात्मा भवेद्धि सः ॥५॥ अन्योसावहमन्योस्मि त्युपास्ते योन्यदेवतां ॥ न स वेद नरो ब्रह्म स देवानां यथा पशुः ॥६॥ अहमात्मा न चान्योस्मि ब्रह्मैवाहं न दुःखभाक् ॥ सच्चिदानंदरूपोहं नित्यमुक्तः स्वभाववान् ॥ ॥७॥ आत्मानं सततं ब्रह्म संभाव्य विहरंति ये ॥ न तेषां दुष्कृतं किंचिद्दुष्कृतोत्था न चा

ब्रह्मसा क्ष्ये वयं

१

पदः ॥ ८ ॥ आत्मानं सततं ब्रह्म संभाव्य विहरेत्सुखं ॥ क्षणं ब्रह्माहमस्मीति यः
कुर्यादात्मचिंतनं ॥ ९ ॥ तन्महापातकं हंति तमः सूर्योदयो यथा ॥ अज्ञाना
ब्रह्मणो जातमाकाशं बुद्बुदोपमं ॥ १० ॥ आकाशाद्वायुरुत्पन्नो वायुस्तेजः
स्ततः पयः ॥ पयसः पृथिवी जाता ततो व्रीहियवादिकं ॥ ११ ॥ पृथिव्यप्सु प
यो वह्नौ वह्निर्वायौ नभस्यपो ॥ नभोप्यव्याकृते तच्च शुद्धे शुद्धोस्म्यहं हरिः ॥ १२
अहं विष्णुरहं विष्णुरहं विष्णुरहं हरिः ॥ कर्तृभोक्त्रादिकं सर्वं तदविद्योत्थमेव
हि ॥ १३ ॥ अच्युतोहमनंतोहं गोविंदोहमहं हरिः ॥ आनंदोहमशेषोहमजोह
ममृतोस्म्यहं ॥ १४ ॥ नित्योहं निर्विकल्पोहं निराकारोहमव्ययः ॥ सच्चिदानं
दरूपोहं पंचकोशातिगोस्म्यहं ॥ १५ ॥ अकर्ताहमभोक्ताहमसंगः परमेश्व

१

रः॥ सदामत्संनिधानेनचेष्टतेसर्वमिंद्रियं॥१६॥ आदिमध्यांतमुक्तोहंन
बद्धोहंकदाचन॥ स्वभावनिर्मलःशुद्धसएवाहंनसंशयः॥१७॥ ब्रह्मैवा
हंनसंसारीमुक्तोहमितिभावयेत्॥ अशक्नुवन्भावयितुंवाक्यमेतत्सदा
भ्यसेत्॥१८॥ यदभ्यासेनतद्भावोभवेद्भ्रमरकीटवत्॥ अत्रापहायसंदे
हमभ्यसेत्कृतनिश्चयः॥१९॥ ध्यानयोगेनमासेनब्रह्महत्यांव्यपोहति
संवत्सरकृताभ्यासात्सिध्यष्टकमवाप्नुयात्॥२०॥ यावज्जीवंसदाभ्यासा
ज्जीवन्मुक्तोभवेन्मुनिः॥ नाहंदेहोनचप्राणोनेंद्रियाणितथैवच॥२१॥ ना
मनोहंनबुद्धिश्चनाहंचित्तमहंकृतिः॥ नाहंपृथ्वीनसंदेहंसलिलंनचवन्हि
स्तथानिलः॥२२॥ नचाकाशोनशब्दश्चनस्पर्शस्तथारसः॥ नाहंगंधोनरूपंचे च

ब्रह्म०

न मायाहं न संसृतिः ॥२३॥ सदा साक्षिस्वरूपत्वात्स्थित एवास्मि केवलः ॥ मय्येव स
कलं जातं मयि सर्वं प्रतिष्ठितं ॥२४॥ मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहं ॥ स
र्वज्ञोहमनंतोहं सर्वेशः सर्वशक्तिमान् ॥२५॥ आनंदः सत्यबोधोहमिति ब्रह्मानु
चिंतनं ॥ अयं प्रपंचो मिथ्यैव सत्यं ब्रह्माहमद्वयं ॥२६॥ अत्र प्रमाणं वेदांता गुरवो
नुभवस्तथा ॥ ब्रह्मैवाहं न संसारी न चाहं ब्रह्मणः पृथक् ॥२७॥ नाहं देहो न मे देहः
केवलोहं सनातनः ॥ एकमेवाद्वयं ब्रह्म नेह नानास्ति किंचन ॥२८॥ इति० भगवत्पा
दविरचितं शोधितब्रह्मैक्यानुचिंतनं ब्रह्मसाक्षात्कारस्तोत्रं संपूर्णं ॥

२

[OrderDescription]
,CREATED=05.10.20 10:51
,TRANSFERRED=2020/10/05 at 10:52:57
,PAGES=4
,TYPE=STD
,NAME=S0003825
,Book Name=M-1739-BRAHMKYANUCHINTAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,